नं० ११५८ - घ

२५५

क ध्यानबिन्दूपनिषत्

ख तेजबिन्दूपनिषत् योगशिखोपनिषच्च

ग कठरुद्रोपनिषत् पत्रे २ (सम्पूर्णः)

नं० ११५८ - घ

ॐ योगं तत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया तच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते विष्णु
र्नाम महायोगी महाभूतो महातपाः तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः यदि शैलसमं पापं
विस्तीर्णं योजना बहून् भिद्यते ध्यानयोगेन नान्यो भेदः कदाचन बीजाक्षरात्परं बिंदु नादं बिं
दोः परे स्थितं सुशब्दं चाक्षरे क्षीणे निःशब्दं परमं पदं अनाहतं च यच्छब्दं तस्य शब्दस्य यत्परं
तत्परं विंदते यस्तु स योगी छिन्नसंशयः बालाग्रशतसहस्रार्द्धं तस्य भागस्य भागशः तस्य
भागस्य भागार्द्धं तज्ज्ञेयं च निरंजनं पुष्पमध्ये यथा गंधं पयोमध्ये यथा घृतं तिलमध्ये यथा
तैलं पाषाणेष्विव कांचनं एवं सर्वाणि भूतानि मणौ सूत्रमिवात्मनि स्थिरबुद्धिरसंमूढो ब्र
ह्मविद्ब्रह्मणि स्थितः तिलानां तु यथा तैलं पुष्पे गंधमिवाश्रितं पुरुषस्य शरीरे तु स बाह्या
भ्यंतरे स्थितं वृक्षं तु सकलं विद्याच्छाया तस्यैव निष्कला सकले निष्कले भावे सर्वत्रात्माव्य
वस्थितः अतसीपुष्पसंकाशं नाभिस्थाने प्रतिष्ठितं चतुर्भुजं महावीरं पूरकेण विचिंतयेत्
कुंभकेन हृदिस्थाने चिंतयेत्कमलासने ब्रह्माणं रक्तगौरांगं चतुर्वक्त्रं पितामहं रेचकेन तु
विद्यात्माललाटस्थं त्रिलोचनं शुद्धस्फटिकसंकाशं निष्कलं पापनाशनं अष्टपत्रमधःपु
ष्पमूर्द्धनालमधोमुखं कदलीपुष्पसंकाशं सर्वदेवमयांबुजं शतपत्रं शतपत्राढ्यं विप्र
कीर्णाब्जकर्णिकं तत्रार्कचंद्रवह्नीनामुपर्युपरि चिंतयेत् पद्मस्योद्घाटनं कृत्वा बोधं चं
द्राग्निसूर्ययोः तस्यात् हृद्बीजमाहृत्य आत्मा संचरते ध्रुवं त्रिस्थानं च त्रिमार्गं च त्रिब्रह्म
च त्रिरक्षरं त्रिमात्रं चार्द्धमात्रं च यस्तं वेद स वेदवित् तैलधारमिवाच्छिन्नं दीर्घघंटानुना
सिकं अवाच्यं प्रणवस्याग्रं यस्तं वेद स वेदवित् प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्य
ध्ये ललाटस्तु नासिकायां तु मूलतः अमृतस्थानं विजानीयात् विष्णस्यायतनं महत् विष्णस्याय
तनं महदिति शतध्यानबिंदूपनिषत्समाप्तं ॥

वि. उ. ३

ॐ तेजबिंदुः परंध्यानं विश्वातीतं हृदि स्थितं आणवं शांभवं शाक्तं स्थूलं सूक्ष्मं परं च यत् दुः
साध्यं च दुराराध्यं दुःप्रेक्ष्यं च दुराश्रयं दुर्लक्षं दुस्तरं ध्यानं मुनीनां च मनीषिणां जिताहारो
जितक्रोधो जितसंगो जितेंद्रियः निर्द्वंद्वो निरहंकारो निराशीरपरिग्रहः आगम्यागम्यक।
र्ता च गुरुमानार्थमानसः मुखानि त्रीणि विंदंति त्रिधामं हंसमुच्यते परं गुह्यमिदं स्थानं अ
व्यक्तं ब्रह्म निराश्रयं व्योमरूपं कला सूक्ष्मं विष्णोस्तत्परमं पदं त्र्यंबकं त्रिगुणं स्थानं त्रि
धातु रूपवर्जितं निश्चलं निर्विकल्पं च निराधारं निराश्रयं उपाधिरहितं स्थानं वाङ्मनोती
तगोचरं स्वभावभावनाग्राह्यं संघातैकपदोज्झितं आनंदं नंदनातीतं दुःप्रेक्ष्यमजमव्ययं
चित्तवृत्तिविनिर्मुक्तं शाश्वतं ध्रुवमच्युतं तद्ब्रह्माणं तदध्यात्मं तन्निष्ठास्तत्परायणं अ
चित्तचित्तमात्मानं तद्व्योम परमं स्थितं अशून्यं शून्यभावं च शून्यातीतमवस्थितं न ध्यानं
न च वा ध्याता न ध्येयो ध्येय एव च सर्वं च परमं शून्यं न परं परमात्परं अचिंत्यमप्रबुद्धं च न
च सत्यं न संविदुः मुनीनां तत्त्वयुक्तं तु न देवा न परं विदुः लोभं मोहं भयं दर्पं कामं क्रोधं च।
किल्बिषं शीतोष्णं क्षुत्पिपासं च संकल्पं च विकल्पकं न ब्रह्मकुलदर्पं च न मुक्तग्रंथसं।
चयं न भयं सुखदुःखं च तथा मानापमानयोः एतद्भावविनिर्मुक्तं तद्ग्राह्यं ब्रह्म तत्परं तद्ग्रा
ह्यं ब्रह्म तत्परमिति इति तेजबिंदूपनिषत् समाप्तं शुभं भवतु श्रीरस्तु श्रीराम ॥
ॐ योगशिखां प्रवक्ष्यामि सर्वज्ञानेषु योत्तमां यदानुध्यायते मंत्रं गात्रकंपोभिजायते आ
सनं पद्मकं बद्ध्वा यच्चान्यदपि रोचते कुर्यान्नासाग्रदृष्टिं च हस्तौ पादौ च संयुतौ मनः सर्वत्र
संयम्य ॐकारं तत्र चिंतयेत् ध्यायेत सततं प्राज्ञो हृत्कृत्वा परमेष्ठिनं एकस्तंभे नवद्वारे त्रिस्थू
णे मया लब्धयोगेन बोद्धव्यं प्रसन्नं परमेष्ठिनं जन्मांतरसहस्रेषु यदा नाश्नाति किल्बिषं तदा पश्यति योगे
न संसारच्छेदनं परं संसारच्छेदनं परमिति शिवलोप ॥ ॥ ॥ ॥

[illegible]

ॐ योनुक्रमेण सन्यसति सन्यस्तो भवति कोयं संन्यास उच्यते कथं सन्यस्तो भवति य आ
त्मानं क्रियाभिः सुगुप्तं करोति मातरं पितरं भार्यां पुत्रान्सुहृदो बंधून् अनुमोदयित्वा ये चास्य
त्विजस्तान् सर्वांश्च पूर्ववद्वृणीत्वा वैश्वानरीमिष्टिं कुर्यात् सर्वस्वं दद्यात् यजमानस्यांगा
त्विजस्त्विजः सर्वैः पात्रैः समारोप्य यदाहवनीये गार्हपत्ये अन्वाहार्यपचने सभ्यावस
थ्ययोश्च प्राणापानव्यानोदानसमानान् सर्वान्सर्वेषु समारोपयेत् सशिखान्केशान्निष्कृ
त्य विसृज्य यज्ञोपवीतं निःक्रम्य पुत्रं दृष्ट्वा त्वं ब्रह्म त्वं यज्ञस्त्वं सर्वमित्यनुमंत्रयेत् यद्यपुत्रो भ
वत्यात्मानमेवध्यात्वा अनपेक्षमाणः प्राचीमुदीचीं वा दिशं वा प्रव्रजेत् चतुर्षु वर्णेषु भैक्ष्य
चर्यं चरेत् पाणिपात्रेणाशनं कुर्यात् औषधवदश्नीयात् यथालाभमश्नीयात् प्राणसंधा
रणार्थं यथा यथा मेदोवृद्धिर्न जायते कृशीभूत्वा ग्राम एकरात्रं नगरे पंचरात्रं चतुरो मासा
न्वार्षिकान् ग्रामे वा नगरे वा पिबसेद्विशीर्णं वस्त्रं वल्कलं वा प्रतिगृह्य नान्यत्प्रतिगृह्णीया
त् यद्यशक्तो भवति यो नल्केशः सह सतस्य तपइति यो वा एवं क्रमेण सन्यसति यो वा
पश्यति इति किमस्य यज्ञोपवीतं का वास्य शिखा कथं वास्योपस्पर्शनमिति तान्होवावेद
मेवास्य तद्यज्ञोपवीतं यदात्मध्यानं विद्या सा शिखा नीरैः सर्वत्रावस्थितैः कार्यं निव
र्तयन् उदपात्रे जलतीरे निकेतनं हि ब्रह्मवादिनो वदंति षदंचास्तमितआदित्ये कथं वा
स्योपस्पर्शनमिति तान्होवाच यथाहनि तथा रात्रौ नास्य नक्तं न वा दिवा तदप्येतदृषि
णोक्तं सकृद्दिवा हैवास्मै भवति य एवं विद्वानेतेनात्मानं संधत्ते संधत्ते ॥ ३ ॥ देवा ह वै स
मेत्य प्रजापतिमब्रुवन् न विद्मा मा न विदाम इति सोब्रवीद्ब्राह्मणेभ्यो मे वद्धव्या तास्य ये ति
द्धारस्त्वमोंकारस्त्वं स्वाहा स्त्वं स्वधा त्वं धाता त्वं विधाता त्वं त्वष्टा त्वं प्रतिष्ठासीन् पथपुत्रो वद

कं० ४

त्यहं ब्रह्माहं यज्ञोहं वषट्कारोहमोंकारोहं धाताहं विधाताहं त्वष्टाहं प्रतिष्ठास्मीति तान्येतान्यनु व्रजन्ताश्रु मापातयेत् यदश्रु मापातयेत् प्रजां निर्घाच्छिं घात् प्रदक्षिणमावृत्यैतत्त्रेत चानवेक्ष्यमाणाः प्रत्यायेति स स्वर्ग्यो भवति स्वर्ग्यो भवति ब्रह्मचारी वेदमधीत्य वेदोक्ते दान्याचरति ब्रह्मचर्योदारानाहृत्य पुत्रानुत्पाद्य तानुरूपाभिर्वृत्तिभिर्वितत्येष्टा च शक्तितो यज्ञैस्तस्य सन्यासो गुरुभिरनुज्ञातस्य बान्धवैश्च सोरण्यं परेत्य द्वादशरात्रं पयःसाग्निहोत्रं जुहुयात् द्वादशरात्रं पयोभक्षः स्यात् द्वादशरात्रस्यान्तेऽग्नये वैश्वानर प्रजापतये च प्राजापत्यं चरुं वैष्णवं त्रिकपालमग्निं संस्थितानि पूर्वाणि दारुपात्राण्यग्नौ जुहुयात् मृन्मयान्यप्सु जुहुयात् तैजसानि गुरवे दद्यात् मा त्वं मामवहाय परागा नाहं त्वामवहाय परागामित्येवं गार्हपत्यमित्येवं दक्षिणाग्निमेवमाहवनीयमरणि देशाद्भस्म मुष्टिं पिवेदित्येके सशिखान्केशान्निःकृत्य विसृज्य यज्ञोपवीतं भूः स्वाहेत्यप्सु जुहुयात् अत उर्ध्वमनशनमपां प्रवेशमग्निप्रवेशं वीराध्वानं महाप्रस्थानं वृद्धाश्रमं वा गच्छेत् पयः सायं प्राश्नीयात् सोस्य सायंहोमो यत्प्रातः सोयं प्रातर्यद्दर्शे तद्दर्शे यत्पौर्णमास्येतत्पौर्णमास्यं यद्वसन्ते केशश्मश्रुलोमनखानि वापयेत् सोस्याग्निष्टोमः सोस्याग्निष्टोमः सन्न्यस्याग्नीन्न पुनरावर्तयेत् यन्नमस्कं जो यामावाहयेत् इत्याध्यात्ममन्त्रान् जपेत् स्वस्ति सर्वजीवेभ्य इत्युक्त्वा दीक्षामुपेयात् काषायवासः कक्षोपस्थं लोमानि वर्जयेत् ऊर्ध्वमुंडोस्त्रोदरपात्रः कस्मादित्य ऽध्यात्ममस्य ध्यातमनुर्ध्व गोपायुर्विमुक्तमागोमिवेदनिकेतश्चरेद्भिक्षाशीनं दद्यान्नैवैकं धारये जंतुसंरक्षणार्थं वर्षा वर्जमिति तदपि श्लोकः कुंडिकां चमसं शि
दनोनशायेसरान् एतां वृत्तिमुपासीनो तापयंती द्रियाणितु तापयंती द्रियाणि तुमिति इति कठश्रुतिः

उपनिषत्समाप्ता।